# प्राचीनन्यायवैशेषिकम्

स्तरः - शास्त्री　　　　　　　　　　खण्डः - द्वितीयः

पत्रम् - चतुर्थम्　　　　　　　　　　पूर्णाङ्काः - १००

पाठ्यांशनाम - न्यायदर्शनाभिमतपदार्थाः

पाश्चात्त्यतर्कशास्त्रञ्च　　　　पाठ्यांशसङ्केतः - प्रा.न्या.४०४

वार्षिकः पाठ्यभारः - १६० घण्टाः　　　　　　सा‍प्ताहिकः पाठ्यभारः - ६

## १. पाठ्यांशपरिचयः

पाठ्यांशोऽयं प्राचीनन्यायविषयमधीयानानां छात्राणां कृते शास्त्रिद्वितीयवर्षस्य चतुर्थपत्रत्वेन निर्धारितो वर्तते ।

अत्र पाठ्यांशे न्यायदर्शनाभिमताः प्रमाणप्रमेयादयः पदार्थाः पाठ्यत्वेन समाविष्टाः सन्ति । अथ च पाश्चात्त्यतर्कपद्धतिरपि पाठ्यत्वेन सन्निविष्टा वर्तते ।

पाठ्यांशश्चाऽयं पञ्चसु प्रकरणेषु विभक्तो वर्तते । तत्र प्रथमप्रकरणे न्यायभाष्यस्यादिवाक्यस्योत्थानबीजम्, संशयादीनां पृथगुद्देशसार्थक्यम्, चत्वारि प्रमाणानीत्येतावन्तो विषयाः सन्निविष्टाः सन्ति । द्वितीये च प्रकरणे न्यायदर्शनाभिमतमात्मादिकं प्रमेयं निर्धारितं वर्तते । प्रकरणे च तृतीये न्यायदर्शनाभिमतसंशयादिनिर्णयान्तपदार्था निर्धारिता इति । एवं रीत्या तुरीये प्रकरणे न्यायदर्शनाभिमतवादादिनिग्रहस्थानान्तपदार्थाः पाठ्यविषयत्वेन निर्धारिताः सन्ति । एवं रीत्या पञ्चमे च प्रकरणे पाश्चात्त्यतर्कपद्धतेः सङ्क्षिप्तेतिहासं समाविश्य केचन प्रमुखविषयाः सन्निविष्टाः सन्ति । तत्क्रमे पाश्चात्त्यतर्कशास्त्रपद्धतौ अरस्तुमहोदयस्य चिन्तनम्, तस्य योगदानम्, तर्कपद्धतौ वादत्रयम्, प्रमाणमेवमादयो विषया विन्यस्ता वर्तन्ते । अत्र तावत् सामान्यविशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधिप्रश्नपत्रनिर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि समाविष्टानि सन्तीति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः सामान्यतयाधोनिर्दिष्टविषयेषु समर्था भविष्यन्ति -

(क) न्यायभाष्यस्यादिवाक्यस्योत्थानबीजप्रतिपादने, संशयादीनां पृथगुद्देशसार्थक्यवर्णने, चतुर्णां प्रमाणानां निरूपणे च,

(ख) न्यायदर्शनाभिमतात्मादिप्रमेयव्याख्याने,

(ग) न्यायदर्शनाभिमतसंशयादिनिर्णयान्तपदार्थानां वर्णने,

(घ) न्यायदर्शनाभिमतवादादिनिग्रहस्थानान्तपदार्थानां निरूपणे,

(ङ) पाश्चात्त्यतर्कपद्धतेः सङ्क्षेपेण वर्णने च ।

**३. प्रकरणगतविशिष्टोद्देश्यानि अथ च पाठ्यविषयज्ञापनपूर्वकमङ्कानां पाठघण्टानाञ्च निर्देशनम्**

| **प्रकरणानि** | **प्रकरणगतविशिष्टोद्देश्यानि** | **पाठ्यविषयाः** | **अङ्काः** | **पाठघण्टाः** |
|---|---|---|---|---|
| (क) | न्यायभाष्यस्यादिवाक्योत्थानबीजप्रतिपादने, संशयादीनां पृथगुद्देशबीजनिरूपणे, प्रत्यक्षादीनां चतुर्णां प्रमाणानां व्याख्याने च सामर्थ्यसम्पादनम् । | न्यायभाष्यस्यादिवाक्यम्, संशयादीनां पृथगुद्देशबीजम्, न्यायसूत्रभाष्यप्रतिपादितानि प्रत्यक्षादीनि चत्वारि प्रमाणानि । | २० | ३२ |
| (ख) | न्यायदर्शनभिमत्यनुसारेण इच्छादिभिरात्मनः सिद्धौ, शरीरेन्द्रियलक्षणव्याख्याने, अर्थबुद्धिमनसां लक्षणवर्णने, प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गविवेचने च नैपुण्यार्जनम् । | न्यायसूत्रभाष्ये प्रथमाध्याये प्रतिपादितमात्मादिकं प्रमेयम् । | १५ | २४ |
| (ग) | न्यायदर्शनाभिमतसंशयादिवितण्डान्तपदार्थानां निवर्चने, सकारणसंशयस्य निर्वचने, प्रयोजनविश्लेषणे, सभेदसिद्धान्तव्याख्याने, सभेदावयवविश्लेषणे, तर्कनिर्णययोर्निर्वचने च नैपुण्यसम्पादनम् । | न्यायसूत्रभाष्ये प्रतिपादिताः संशयादिनिर्णयान्ताः पदार्थाः । | २० | ३२ |
| (घ) | परस्परं भेदपुरस्सरं वादजल्पवितण्डानां विवेचने, सभेदोपभेदहेत्वाभासनिरूपणे, जातिनिग्रहस्थानयोर्विश्लेषणे च | न्यायसूत्रभाष्यभाष्ये प्रतिपादिता वादादिनिग्रहस्थानान्ताः पदार्थाः । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | सामर्थ्यार्जनम् । | | | |
| (ङ) | पाश्चात्यतर्कशास्त्रस्य सङ्क्षिप्तेहासवर्णने,<br><br>तर्कशास्त्रपद्धतौ अरस्तुमहोदयस्य चिन्तनव्याख्याने,<br><br>तर्कपद्धतौ वादत्रयस्य विश्लेषणे,<br><br>प्रमाणविषयकसङ्क्षिप्तविवेचने,<br><br>अनुमानविधिविषयके व्याख्याने (तत्र आगमनविधौ व्याप्तिविधौ च),<br><br>न्यायवाक्यस्य विश्लेषणे,<br><br>तर्कशास्त्रविषये लकमहोदयस्य चिन्तने,<br><br>लक्षणसम्बद्धधर्मत्रयस्य व्याख्याने च सामर्थ्यार्जनम् । | पाश्चात्यतर्कपद्धतेः सङ्क्षिप्तेहासः । तत्रारस्तोश्चिन्तनम्, योगदानञ्च । वादत्रयम् । प्रत्यक्षादिप्रमाणत्रयम् । अनुमानविधिविषयः । न्यायवाक्यानि, लकमहोदयस्य चिन्तनम्, लक्षणसम्बद्धधर्माः । | १५ | २४ |
| | | | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

### ‘क’प्रकरणे

न्यायभाष्यस्यादिवाक्यस्योत्थानबीजानुसन्धानम्, प्रमाणादीनामुद्देशः, संशयादीनां पृथग्वचनसार्थक्यप्रतिपादनम्, न्यायप्रवृत्तिस्थानप्रदर्शनम्, न्यायन्यायाभासभेदप्रदर्शनम्, वादजल्पवितण्डानां सप्रयोजननिष्प्रयोजनत्वनिर्धारणम्, दृष्टान्तसिद्धान्तावयवानां भाष्यरीत्या विवेचनम्, तर्कस्य प्रमाणानुग्राहकत्वप्रदर्शनम्, निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां भाष्यरीत्या सङ्क्षिप्तविवेचनम् । प्रत्यक्षलक्षणम्, तत्र अव्यपदेश्य-अव्यभिचारि-व्यवसायात्मकपदानां प्रयोजननिरूपणम् । अनुमानलक्षणम्, तत्पूर्वकपदस्यार्थः, अनुमानत्रैविध्यम्, पूर्ववदित्यादीनामर्थद्वयम् । उपमानलक्षणम्, शब्दलक्षणम्, तद्द्वैविध्यनिरूपणम् ।

**'ख'प्रकरणे**

प्रमेयभेदाः, इच्छादिभिर्लिङ्गैरात्मानुमानप्रकारः, देहेन्द्रियबुद्धिव्यतिरिक्तात्मसिद्धिः, शरीरम्, इन्द्रियाणि, तेषां भौतिकत्वसाधनम्, अर्थाः, बुद्धिलक्षणम्, बुद्धेः पर्यायपदानामभिधानबीजम्, मनोलक्षणम्, प्रवृत्तिलक्षणम्, दोषलक्षणम्, प्रेत्यभावः, फललक्षणम्, दुःखम्, मोक्षे नित्यसुखाभिव्यक्तेर्निरासपूर्वमपवर्गनिरूपणम् ।

**'ग'प्रकरणे**

सभेदसंशयनिरूपणम्, प्रयोजनलक्षणम्, दृष्टान्तलक्षणम्, भेदपुरस्सरं सिद्धान्तनिर्वचनम्, प्रतिज्ञादयो न्यायावयवाः, प्रतिज्ञादीनां विवेचनम्, प्रतिज्ञाद्यवयवार्थकथनम्, तर्कलक्षणस्य पदसार्थक्यप्रदर्शनपूर्वकं तर्कलक्षणम्, निर्णयविवेचनम् ।

**'घ'प्रकरणे**

परस्परं भेदपुरस्सरं वादजल्पवितण्डानिर्वचनम्, सभेदोपभेदहेत्वाभासाः, सभेदं छलम्, जातिनिग्रहस्थाने ।

**'ङ'प्रकरणे**

पाश्चात्त्यतर्कपद्धतिः । पाश्चात्त्यतर्कशास्त्रस्य सङ्क्षिप्तेहासः । तर्कशास्त्रपद्धतौ अरस्तुमहोदयस्य चिन्तनम्, तस्य योगदानञ्च । तर्कपद्धतौ वादत्रयम् । प्रमाणम् (प्रत्यक्षम्, अनुमानम्, आप्तवचनम् (शब्दः) । अनुमानविधिविषयकं चिन्तनम् (आगमनविधिः व्याप्तिविधिश्च), । न्यायवाक्यानि, तर्कशास्त्रविषये लकमहोदयस्य चिन्तनम्, लक्षणसम्बद्धधर्मत्रयम् ।

**५. शिक्षणविधिः शैक्षणिकसामग्री च**

पाठ्यांशस्यास्य शिक्षणे व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्यः विधयो प्रकरणानुसारेण प्रतिपाद्यविषयानुरूपेण चात्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपाणां प्रयोगोऽपेक्षितः । अत्यावश्यके स्थितिविशेषे अन्तर्जालादिमाध्यमेन दूरशिक्षणमपि कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्रादीनि प्रयुज्यानि । तद्व्यवस्थापनं सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेयम् । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या । यथाकालं शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तद्व्यवस्थापनं विभागेन कार्यम् । तदर्थं विद्यापीठेन विश्वविद्यालयेन वा साहाय्यं विधेयम् ।

**६. मूल्याङ्कनविधिः**

आन्तरिक(निर्माणात्मक)बाह्य(निर्णयात्मक)भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य

सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्य-कक्षापरीक्षापरियोजनाकार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिकमूल्याङ्कनस्य कृते पञ्चविंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालयपरीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । वार्षिकपरीक्षायाः कृते सति सम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम् -

**वार्षिकपरीक्षार्थं प्रश्नपत्रनिर्माणप्रकारविवरणम्**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| क, ख,ग, घ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| क, ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः ( बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

**७. पाठ्यसामग्रीसूची**

**(क) पाठ्यग्रन्थाः**


वात्स्यायनः **न्यायभाष्यम्**, प्रथमाध्यायान्तम्, सुदर्शनाचार्यकृतप्रसन्नपदापरिभूषितम्, अभिनव संस्करण, बौद्धभारती, वाराणसी, सन् १९९८) ।

श्रीनिवासः बरखेडी **पाश्चात्त्यं तर्क-शास्त्रम्**, नागपुर : कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, सन् २०२० ।


**(ख) सन्दर्भग्रन्थाः**


अन्नम्भट्टः, **तर्कसङ्ग्रहः,** दीपिकाकिरणावलीन्यायबोधिनीपदकृत्यटिप्पण्यादिसहितः, चौखम्भा विद्याभवन वाराणसी, सन् २००३ ।

उदयनाचार्यः		**किरणावली**, सम्पादक - विन्ध्येश्वरीप्रसाद द्विवेदी, वनारस संस्कृत सिरिज, वाराणसी, सन् १९१९ ।

केशवशरण अर्याल,		**न्यायसूत्र र वैशेषिकसूत्रको तुलनात्मक पर्यालोचन**, नेपाल प्रज्ञा प्रतिष्ठान कमलादी, काठमाडौँ, वि.सं.२०७५ ।

चन्द्रधर शर्मा,		**भारतीय दर्शन : आलोचना और अनुशीलन,** पुनर्मुद्रण, मोतीलाल वनारसीदास, दिल्ली, सन् १९९८ ।

...		**पाश्चात्त्य दर्शन**, पुनर्मुद्रण संस्करण, मोतीलाल बनारसीदास, दिल्ली, सन् २००३ ।

जगदीश काश्यप,		**पाश्चात्त्य तर्क-शास्त्र,** भारतीय ज्ञानपीठ, वनारस, सन् १९४७।

भट्टराई पद्मप्रसाद (अनु)		**गौतमन्यायसूत्रम्,** (आह्निकद्वयले युक्त प्रथम अध्यायको भाष्यसमेत), जयतु संस्कृत, काठमाडौँ, वि.सं.२०६८ ।

वरदराजाचार्यः		(सन् १९०३), तार्किकरक्षा (न्यायसारसङ्ग्रहाभिधव्याख्यासहिता मल्लिनाथसूरिविरचितनिष्कण्टकव्याख्यानुगता च), सम्पादकः - विन्ध्येश्वरीप्रसादद्विवेदी, ...?

विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली**, किरणावलीव्याख्यासहिता, पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी, वि.सं.२०५२ ।